# Shivoham Stotram

# શિવોહંસ્તોત્રમ્

## Document Information

Text title : Shivoham Stotram

File name : shivohaMstotram.itx

Category : shiva, shrIdharasvAmI, stotra, panchaka

Location : doc_shiva

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

# શિવોહંસ્તોત્રમ્

(સ્રગ્ધરાવૃત્તમ્)

સ્વાર્ચિઃ સત્યસ્ય સત્યં ગુણરહિતપરાકાશરૂપં પ્રશાન્તં
સર્વસ્મિન્ યત્સ્વમાત્રં સદિતિ ચિદિતિ વા દૃશ્યશૂન્યં વિશુદ્ધમ્ ।
માયાઽવિદ્યાદિહીનં નિરતિશયસુખં નિસ્તરઙ્ગાબ્ધિવદ્યત્
અદ્વૈતં બ્રહ્મ નિત્યં શ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૧॥

વિશ્વં નેતિ પ્રમાણાદ્વિગલિતજગદાકારભાસા સ્વમાત્રઃ
સમ્યક્ સચ્ચિદ્ઘનૈકામૃતસુખકલાસ્વાદતૃપ્તો વિવેકી ।
નિર્દ્વન્દ્વો નિત્યમુક્તો વિગલિતમમતાહઙ્કૃતિર્નિત્યતૃપ્તઃ
આસ્તે યદ્બ્રહ્મમાત્રં શ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૨॥

આદૌ મધ્યે તથાન્તે જનિમૃતિફલદં કર્મમૂલં સુદુઃખં
છિત્ત્વા સંસારવૃક્ષં નિજનિરતિશયાઽસઙ્ગશસ્ત્રેણ પૂર્ણમ્ ।
ભાસા યસ્યૈવ સર્વં ભસિતયતિરુચા ભાસકં ભાવનાનાં
જીવો બ્રહ્મૈવ યત્સ્યાચ્છ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૩॥

જ્ઞાત્વા નિઃસારમેવં જગદખિલમિદં ભ્રાન્તિમોહપ્રદં યત્
ત્યક્ત્વા ભોગૈકવાઞ્છાં વિરતિયુત ઇતો મન્યતે યત્સ્વસૌખ્યમ્ ।
આમૃત્યોર્બ્રહ્મલોકં શત શત ગુણિતં તારતમ્યેન ભાન્તં
યસ્મિન્નલ્પં સુખં યચ્છ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૪॥

મૃત્યોરાપ્નોતિ મૃત્યું સ ઇહ જગદિદં યસ્તુ નાનેવ પશ્યેત્
ઉક્ત્વા યત્પૂર્ણરૂપં શ્રુતિશિરસિ મતં નેહ નાનાસ્તિ વાચા ।
આપ્તોક્ત્યા ભાતિ યદ્વદ્વ્યપગતફણિનીરજ્જુરેકા ભ્રમાન્તે
તદ્વદ્બ્રહ્માદ્વયં યચ્છ્રુતિષુ નિગદિતં કેવલં તચ્છિવોહઽમ્ ॥ ૫॥

(અનુષ્ટુપ્ છન્દઃ)

ય એવમનુસમ્પ્રાપ્તં પઞ્ચશ્લોકાત્મકં હરમ્ ।
સ્વરૂપમનુસન્ધાય પઠતે મુક્ત એવ સઃ ॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામીમહારાજવિરચિતં શ્રીશિવોઽહંસ્તોત્રં સમ્પૂર્ણમ્ ।
રચનાસ્થાનં - કાફી ઉદ્યાનં, ચિક્કમગળૂરુ, સંવત્સરઃ ૧૯૪૩

Proofread by Manish Gavkar

*Shivoham Stotram*
pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*